Roll No. ..........................

Total No. of Pages : 4+1

Total No. of Questions : 6

उत्तरमध्यमा द्वितीयखण्ड

**विषय कोड : 822**

## पुराणेतिहासः

## चतुर्थ-प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

1. वस्तुनिष्ठ प्रश्नाः – 15×1=15

(1) विष्णुपुराणे कति अंशाः सन्ति ?

(i) 3 (ii) 4

(iii) 6 (iv) 7

(2) विष्णुपुराणस्य कर्त्ता कः ?

(i) मनु (ii) गर्ग

(iii) शुकदेव (iv) पाराशर

(3) विष्णुपुराणस्य रचनाकालः अस्ति :

(i) 300 ईस्वी शती (ii) 250 ईस्वी शती

(iii) 400 ईस्वी शती (iv) 600 ईस्वी शती

(4) विष्णुपुराण-तृतीय अंशस्य प्रतिपाद्यविषयः अस्ति :

(i) राजनीतिवर्णनं (ii) इतिहासवर्णनं

(iii) आश्रमकर्त्तव्यवर्णनं (iv) प्रलयवर्णनं



551

(5) विष्णु माहात्म्य प्रतिपादक पुराण: अस्ति ?

(*i*) विष्णुपुराण (*ii*) कूर्मपुराण

(*iii*) लिंगपुराण (*iv*) गरुड़पुराण

(6) विष्णुपुराणस्य तृतीय अंशे कति अध्याया: सन्ति ?

(*i*) 18 (*ii*) 17

(*iii*) 16 (*iv*) 15

(7) विष्णुपुराणस्य तृतीय अंशे चतुर्थ अध्याये कति श्लोका: सन्ति ?

(*i*) 26 (*ii*) 23

(*iii*) 18 (*iv*) 19

(8) विष्णुपुराणस्य सम्पूर्ण श्लोक संख्या: अस्ति :

(*i*) 16,000 (*ii*) 18,000

(*iii*) 21,000 (*iv*) 17,000

(9) अष्टादश पुराणेषु प्राचीनतम पुराणम् अस्ति :

(*i*) ब्रह्मपुराण (*ii*) अग्निपुराण

(*iii*) वायुपुराण (*iv*) विष्णुपुराण

(10) पुराणपंचलक्षणेषु परिगणितम् नास्ति ?

(*i*) धर्मशास्त्र (*ii*) उत्पत्ति

(*iii*) मन्वन्तर (*iv*) संहार

(11) सर्वाधिक प्रियतम: प्रसिद्ध: च पुराणग्रन्थ: अस्ति ?

(*i*) भागवतपुराण (*ii*) अग्निपुराण

(*iii*) भविष्यपुराण (*iv*) गरुड़पुराण



552

(12) आकारदृष्ट्या वृहत्तम् पुराणग्रन्थः अस्ति :

(*i*) लिंगपुराण (*ii*) वामनपुराण

(*iii*) स्कन्दपुराण (*iv*) वाराहपुराण

(13) उद्भिजविद्यायाः प्रकाशकः पुराणविशेषः अस्ति :

(*i*) विष्णुपुराण (*ii*) भविष्यपुराण

(*iii*) अग्निपुराण (*iv*) स्कन्दपुराण

(14) "भारतीय ज्ञानकोषः" पुराण अस्ति :

(*i*) वराहपुराण (*ii*) ब्रह्मपुराण

(*iii*) अग्निपुराण (*iv*) ब्रह्माण्डपुराण

(15) भागवतपुराणस्य सम्पूर्ण श्लोक संख्या अस्ति ?

(*i*) 10,000 (*ii*) 9,000

(*iii*) 22,000 (*iv*) 18,000

2. युग्म-मेलनं कुरु – 5×1=5

| | **विष्णुपुराणस्यदतीयोऽशः प्रतिपाद्य विषयाः** | **अध्यायाः** |
|---|---|---|
| (*i*) | यमगीता | (अ) त्रयोदशः अध्यायेः |
| (*ii*) | संस्कार | (ब) षष्ठ अध्यायेः |
| (*iii*) | प्रेतकर्म | (स) अष्टादश अध्यायेः |
| (*iv*) | चतुर्दश विद्या | (द) दशम् अध्यायेः |
| (*v*) | राजा शतधनु-कथा | (इ) सप्तमः अध्यायेः |



553

3. युग्म-मेलनं कुरु – 5×1=5

| वर्ण्यविषयः | | सम्बन्धित पुराणग्रन्थः | |
|---|---|---|---|
| (*i*) | सत्यनारायणव्रत कथा | (अ) | बाराहपुराण |
| (*ii*) | ईश्वर गीता | (ब) | गरुड़पुराण |
| (*iii*) | नचिकेतोपाख्यान | (स) | पद्मपुराण |
| (*iv*) | प्रेत खण्ड | (द) | कूर्मपुराण |
| (*v*) | पाताल खण्ड | (इ) | स्कन्दपुराण |

4. लघुउत्तरीय प्रश्नाः (शब्दसीमा : **20** शब्द) – 15×2=30

(1) कीदृशं कर्मणि आचरेत् ?

(2) तृतीयस्य मनोर्नाम किं ? स च कस्य सुतः आसीत् ?

(3) ऋषीणां कति भेदाः ? नामानि लिखतु।

(4) नामकरण-संस्कार-विषये विष्णुपुराणे का निर्देशः उल्लिखितः ?

(5) विष्णुपुराणे कति अंशा सन्ति ? सम्पूर्ण अध्यायः संख्या कियती ?

(6) रात्रिकालीन समये किं परित्यजेत् ?

(7) श्राद्धकर्तायै किं वर्जितं ?

(8) परिव्राजकं लक्षणं किं ?

(9) स्कन्दपुराणं कति खण्डेषु विभक्तम् ? सम्पूर्ण श्लोक संख्या कियती ?

(10) भागवतपुराणे पुराणं दशलक्षणं किम् ?

(11) पौराणिक काल-विभाजनेन अर्वाचीनकालः समयं किं/अर्वाचीनकालीन पुराणानां नामानि लिखतु।



554

(12) भागवतपुराणषविषये संक्षेपे लिखतु।

(13) पुराणलक्षणसन्दर्भे "वंशानुचरितं" स्पष्टयतु।

(14) पद्मपुराणे पुराणस्य का परिभाषा अस्ति ?

(15) सायणाचार्यस्यानुसारं पुराणेन किं तात्पर्यं ?

5. दीर्घउत्तरीय प्रश्नाः (शब्दसीमा : 50 शब्द) – 7×5=35

(1) पुराणं लक्षणम् प्रतिपाद्यताम्।

(2) विष्णुपुराणानुसारं अष्टादश पुराणानां सर्वसम्मत क्रमेण किम् ?

(3) "प्रेतकर्म" वर्णनं लिखतु।

(4) गृहस्थ-पुरुषाय कीदृशं आचरणं वर्जितं ?

(5) इतिहासपुराणं च पञ्चमो वेद उच्यते ? विवेच्यताम्।

(6) भागवतपुराणस्य महत्त्वम् प्रतिपाद्यताम् ?

(7) पुराणानां रचनाकाल-विषये वर्णनं कुरुत।

6. वृहद्उत्तरीय प्रश्नाः (शब्दसीमा : 100 शब्द) – 1×10=10

पुराणानां महत्वं विविच्यताम्।

**अथवा**

पुराणेषु प्रतिपाद्य विषयानां वर्णनं कुरुत।



555

SET-A
Ans

प्राश्निक कोड क्र. 4/1941

पृष्ठ क्र.- 01
प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय ........ पुराणेतिहास ........ विषय कोड ........ 822 ........ माध्यम ........ संस्कृत

कुल प्रश्न ........ 06

समय – 3 घण्टा

पूर्णांक ........ 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| [01] | वस्तुनिष्ठ प्रश्नाः - उत्तराणि | |
| | (1) (iii) – 6 (2) (iv) – पाराशर (3) (iv) 600 ईस्वी शती, | |
| | (4) (iii) – आश्रम कर्त्तव्य कर्म (5) (i) गरुड़ पुराण (6) (i) – (1) – 18 | |
| | (7) (i) – 26 (8) (i) – 16000 (9) (i) ब्रह्म पुराण (10) (i) – धर्मशास्त्र | |
| | (11) (i) – भागवत पुराण (12) (ii) स्कन्द पुराण (13) (ii) भविष्य पुराण | |
| | (14) (iii) अग्नि पुराण (15) (iv) 18000 | |
| [02] | क्रम मेलनं :— | |
| | (i) – इ, (ii) – द, (iii) – अ, (iv) – ब, (v) – स, | |
| [03] | क्रम मेलनं :— | |
| | (i) – इ, (ii) – द, (iii) – अ, (iv) – ब, (v) – स, | |
| [04] | लघु उत्तरीय प्रश्नाः उत्तराणि: | |
| (1) | प्राणिनामुपकाराय यथैवेह परत्र च । | |
| | कर्मणा मनसा वाचा तदेव मतिमान्भजेत ॥ | |
| (2) | तृतीयस्य मनोर्नाम उत्तमः । स आसीत् प्रियव्रतसुतः । | |
| (3) | त्रेया ब्रह्मर्षयः पूर्वं तेभ्यो देवर्षयः पुनः । | |
| | राजर्षयः पुनस्तेभ्य ऋषिप्रकृतयस्त्रयः ॥ | |
| (4) | ततश्च नाम कुर्वीत पितैव दशमेऽहनि । | |
| | देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम् ॥ | |
| (5) | विष्णु पुराणे षट् अंशा सन्ति । सम्पूर्ण अध्याय संख्या 126 अस्ति । | |
| (6) | चतुष्पथं चैत्यतरुं श्मशानोपवनानि च । | |
| | दुष्टस्त्रीसन्निकर्षं च वर्जयेन्निशि सर्वदा ॥ | |
| (7) | वर्ज्यानि कुर्वता श्राद्धं कोपोऽध्वगमनं त्वरा । | |
| | भोक्तुरप्यत्र राजेन्द्र त्रयमेतन्न शस्यते ॥ | |
| (8) | कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये । | |
| | तांस्तु सर्वान्परित्यज्य परिव्राड् निर्ममो भवेत् ॥ | |

हस्ताक्षर

4/1941

556

प्राश्निक कोड क्र. 4/1941

पृष्ठ क्र. - 07
प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय पुराणेतिहास: विषय कोड 822 माध्यम संस्कृत

कुल प्रश्न

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| (09) | स्कन्दपुराणं सप्त खण्डेषु विभक्तम् । सम्पूर्ण श्लोक संख्या 81000 अस्ति । | |
| (10) | सर्गश्च विसर्गश्च वृत्ति रक्षान्तराणि च । वंशो वंशानुचरितं संस्था हेतुरपाश्रय: ॥ | |
| (11) | पौराणिक काल-विभाजनेन अर्वाचीन काल: 900ईस्वी शताब्द्यां – 1000ईस्वी शती । अर्वाचीन पुराणानां नामानि - ब्रह्मवैवर्त पुराण, ब्रह्मपुराण, लिंग पुराणादि । | |
| (12) | भागवतपुराणं सर्वाधिक प्रियतम: प्रसिद्ध: च । श्री मद्व्यासकृत प्रथिततमं पुराणम् । भागवत पुराणं स्कन्धेषु विभक्तम् । सम्पूर्ण श्लोक संख्या 18000 अस्ति । भागवत हि धर्मार्थकाममोक्षात्मकस्य चतुर्वर्गस्य साधकमपि निर्णीयते । | |
| (13) | वंशानुचरितं विशिष्टवंशोत्पन्नानां नृपादीनां विशिष्टं चरितं विशिष्टतया वर्ण्यते । भागवतानुसारं तल्लक्षणं विद्यते — "वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ | |
| (14) | पद्मपुराणे पुराणस्य परिभाषा अधोलिखितास्ति - "पुरा परम्परां वष्टि पुराणं तेन तत् स्मृतम् ।" | |
| (15) | "पुराणं पुरातनवृत्तान्तकथन रूपमाख्यानम्" इति सायणाचार्यस्यानुसारं पुराणस्य तात्पर्यं । | |
| 5 | दीर्घ उत्तरीय प्रश्ना: — | |
| | (1.) पुराणेषु मुख्यत: पञ्चतत्त्वानां समावेश: स्वीक्रियते । पुराणलक्षण सन्दर्भे विष्णुपुराणे पुराणस्य पञ्चलक्षणानि उक्तानि — – सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ | |

हस्ताक्षर

सर्ग: सृष्टि:, प्रतिसर्ग: सृष्टेर्लय: पुनश्च सृष्टि:, वंश: सृष्टआदौ वंशावली मन्वन्तराणि के के मनव: कदा कदा अजायन्तेति वर्णनानि, वंशानुचरितं सूर्यचन्द्रवंशयोर्विशिष्ट वर्णनम्, इदं वस्तुपञ्चकं पुराणेष्वपेक्ष्यते ॥

SST

प्राश्निक कोड क्र. 4/1941

पृष्ठ क्र.- 03

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय: पुराणेतिहास विषय कोड: 822 माध्यम: संस्कृत

कुल प्रश्न:

समय - 3 घण्टा पूर्णांक: 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| 2. | ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा।<br>तथान्यं नारदीयं च मार्कण्डेयं च सप्तमम्॥<br>आग्नेयमष्टमं चैव भविष्यन्नवमं स्मृतम्।<br>दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम्॥<br>वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम्।<br>चतुर्दशं वामनं च कौर्मं पञ्चदशं तथा॥<br>मात्स्यं च गारुडं चैव ब्रह्माण्डं ततः परम्।<br>महापुराणान्येतानि ह्यष्टादश महामुने॥ | |
| 3. | पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः।<br>त्रिप्रकाराः क्रियाः सर्वास्तासां भेदं शृणुष्व मे॥<br>आदाहवार्यक्षुध्यादिस्पर्शान्तास्तु याः क्रियाः।<br>ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः॥<br>प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।<br>क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः॥ | |
| 4. | अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते।<br>स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥<br>अवज्ञानमहङ्कारो दम्भश्चैव गृहे सतः।<br>परितापोपघातौ च पारुष्यं च न शस्यते॥ | |
| 5. | सर्वजनहिताय सर्वजनबोधाय च प्रसादगुणोपेतायाः पद्धत्याः समाश्रयेण पुराणानां महत्त्वं प्रतिपदम् आलक्ष्यते। भारतीयायाः संस्कृतेः सभ्यतायाश्च यथायथम् अवगमाय पुराणानां नितरां महत्त्वमस्ति। अतएव वायुपुराणे तन्महत्त्वम् उद्घोष्यते यत् चतुर्वेदविदपि पुराणज्ञानविहीनो न विचक्षणपदवीम् आरोढुं शक्नोति। उक्तं च-<br>यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।<br>न चेत् पुराणं संविद्यात् नैव स स्याद् विचक्षणः॥ पुराणानां धर्मार्थकाममोक्षात्मक-चतुर्वर्ग-साधनाद् वेदत्वं प्रतिपाद्यते। पुराणं पञ्चमो वेद इत्यभिधीयते। उक्तम् च भागवते -<br>इतिहासपुराणं च पञ्चमो वेद उच्यते॥ | |

हस्ताक्षर 4/1941

प्राश्निक कोड क्रं. 4/1941



प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय पुराणेतिहासः विषय कोड 822 माध्यम संस्कृत

कुल प्रश्न

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| (06) | श्रीमद्भागवतं नाम श्रीमद्व्यासकृतं प्रथिततमं पुराणम्। समग्रेऽपि पुराणसाहित्ये न तथा पावनं मधुरं चेतः प्रसादजननं विवेकालोक प्रसारकं पुराणमन्यद् यथा श्रीमद्भागवतम्। भागवतं हि धर्मार्थकाममोक्षात्मकस्य चतुर्वर्गस्य साधकमपि निर्णीयते। श्रीमद्भागवते कथाख्यानादिकम् आश्रित्य क्वचिद् दर्शनम् क्वचिद् वेदतत्त्वम्, क्वचित् सांख्ययोगसिद्धान्ताः क्वचिद् उपनिषद्-तत्त्वम्, क्वचिद् आत्मज्ञानम् क्वचिच्च परमा भक्तिः वर्ण्यते। एतद् भागवतं नाम परमं ज्योतिः। विद्योतयति चैतद् ज्योतिः सचेतसां चेतांसि अपहरति मलं मलदूषितानां मलिनात्मनाम्, प्रबोधयति विवेकम् रोधयति पापततिम्, अवगमयति दर्शनतत्त्वम्, विगमयति दुर्मतिम्, संगमयति च सद्भावसरणिम्। | |
| (07) | पुराणानां रचनाकालः — पुराणानां रचनाकालः प्रथमशती ईस्वी 1000 ईस्वीय संवत्सरं यावत् स्वीक्रियते। इदं तु सत्यं यत् पुराणस्यादिमं रूपं सम्प्रति नैवाप्यते। पुराणं कदाचिदेक समये नारच्यत, समये समये तत्राध्यायाः योजिताः, 1000 शती ईस्वी पर्यन्तं तेषां वर्तमानरूपमुत्पन्नमासीत्। पुराणस्य रचनाकालः वर्गीकृतः अधोलिखितः प्राच्यकालीनः [प्रथम शती ईस्वी - 400 ईस्वी शती] मध्यकालीनः [500 ईस्वीशती - 900 ईस्वी शती पर्यन्त] अर्वाचीन कालीनः [900 ईस्वीशती - 1000 ईस्वीशती पर्यन्त] | |
| [06] | बृहद् उत्तरीय प्रश्नाः — | |
| | — पुराणानां महत्त्वं — | |
| | पुराणानि भारतीय-संस्कृतेः पुरातनं स्वरूपं प्रकाशयन्ति, वेदार्थं च कथा-आख्यानादिरूपेण विशदयन्ति, प्राचीनम् इतिहासम् अज्ञातं | |

हस्ताक्षर

चापि ऐतिह्यं प्रकाशताम् आपादयन्ति। एवं भारतीयेतिहास-ज्ञानाय,

4/1941

559

प्राश्निक कोड क्र. 4/1941

पृष्ठ क्र.– 05
प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :– पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय पुराणेतिहास विषय कोड 822 माध्यम संस्कृत

कुल प्रश्न

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|

भारतीय-संस्कृतेः ज्ञानाय, प्राचीनाचार-विचार-परिज्ञानाय प्राचीन-भौगोलिक-विवरण-ज्ञानाय, विविध-शास्त्राणां च सारज्ञानाय पुराणानां महत्त्वं न केनापि निराकर्तुं शक्यते। अतएव वायुपुराणे तन्महत्त्वम् उद्घोष्यते यत् –

"यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चेत् पुराणं स विद्यात् नैव स स्याद् विचक्षणः॥"

पुराणानां धर्मार्थकाममोक्षात्मक-चतुर्वर्ग-साधनाद् वेदत्वं प्रतिपाद्यते। पुराणं पञ्चमो वेद उच्यते। उक्तम् च भागवते – इतिहासपुराणं च पञ्चमो वेद उच्यते॥

वेदेषु यानि तत्त्वानि यत्र तत्र वर्ण्यन्ते तेषां विशदीकरणं पुराणेषु आख्यानरूपेण प्राप्यते। पुराणानामपि धार्मिकदृष्ट्या महत्त्वमधिकम्। वेद-विहितानां धर्माणां सुबोध भाषायां वर्णनं अत्र प्राप्यते – "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥"

पुराणेषु विविधा विद्या यथास्थानं वर्ण्यन्ते। पुराणेषु अग्निपुराणं विविधशास्त्रीयज्ञान-समन्वितत्वाद् विश्वकोशः स्वीक्रियते। एवं पुराणानां महत्त्वं सर्वेषां प्रतिष्ठयति। उक्तं च नारदीय पुराणे – वेदार्थादधिकं मन्ये पुराणार्थं वरानने।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः॥

—: OR :— पुराणेषु प्रतिपाद्या विषयाः –

पुराणेषु मुख्यतो निम्नाङ्कितानां तथ्यानां वर्णनम् अवाप्यते।

1. कस्यचिद् देवस्य कस्याश्चिद् देव्या वोपासना। तस्यैव देवस्य सर्वोत्कृष्टता प्रतिपादनं च।
2. ब्रह्म-विष्णु-महेशेषु कस्याप्येकस्य इष्टदेवत्वेन वर्णनम्।
3. सृष्टेरुत्पत्तेः स्थितेः प्रलयस्य च वर्णनम्।

हस्ताक्षर

P.T.O

4/1941

560

4. देवानाम् ऋषीणां च वंशावलि: तज्जीवनवृत्तं च।
5. मनो: मन्वन्तरस्य च वर्णनम्।
6. नन्द-मौर्य-शुंग-आन्ध्र-गुप्तादिवंशजानां नृपाणां भूपतीनां च इतिवृत्त-वर्णनम्।
7. तीर्थानां प्रथितभौगोलिकस्थानानां तीर्थयात्रादीनां च वर्णनम्।
8. व्रत-जप-उपवास-प्रार्थनादीनां सानुष्ठानं वर्णनम्।
9. अवतारवादस्य मूर्तिपूजाया विविधदेवोपासनायाश्च संस्थापना।
10. सगुणोपासनाया भक्तिमार्गस्य च प्राधान्येन प्रतिपादनम्।
11. दार्शनिक-धार्मिक-राजनीतिक-आचारशास्त्रादि-महत्त्वभाजां विषयाणां विवेचनं विश्लेषणं च।
12. व्याकरण-काव्यशास्त्र-ज्योतिःशास्त्र-शरीरविज्ञान-आयुर्वेदादि-शास्त्रीयाणां वैज्ञानिकानां च विषयाणां तथ्यसंकलनम्।

卐

[signature]
4/1941